Roll No. ....................

Total No. of Questions: 18]

**53**

[Total No. of Printed Pages: 08

# 905

## कक्षा 9 वीं परीक्षा, 2018

# SANSKRIT GENERAL

## संस्कृत सामान्यम्

Time: 03 Hours] [Maximum Marks: 100

***निर्देशाः–*** ***सर्वे प्रश्नाः करणीयाः।***

***प्रश्नानां सम्मुखे अङ्काः दत्ताः।***

प्र.1 उचित विकल्पं चित्वा लिखत– (1×5=5)

(क) "जगन्नाथः" अस्ति–

(i) गुण सन्धि (ii) व्यंजन सन्धि

(iii) विसर्ग सन्धि (iv) अयादि सन्धि

(ख) "यण सन्धि" अस्ति–

(i) रमेशः (ii) गिरीशः

(iii) यद्यपि (iv) सदाचारः

(ग) "सदैव" इत्यस्मिन शब्दे सन्धि अस्ति–

(i) दीर्घ सन्धि (ii) व्यंजन सन्धि

(iii) वृद्धि सन्धि (iv) विसर्ग सन्धि

(घ) "गणेशः" इति पदस्य सन्धि विच्छेद अस्ति–

(i) गण + एशः (ii) गणे + इशः

(iii) गण + ईशः (iv) गणे + शः

(ङ) अधोलिखिततेषु पदेषु अव्ययं चित्वा लिखत–

(i) तव (ii) च

(iii) तुमुन् (iv) पठ्



https://www.evidyarthi.in/

प्र.2 (अ) सामासाधारितं युग्मेलनं कुरूत– (1×3=3)

| (अ) | | (ब) | |
|---|---|---|---|
| (i) | यथाशक्तिः | (i) | कर्मधारय |
| (ii) | पंचवटी | (ii) | अव्ययी भावः |
| (iii) | घनश्यामः | (iii) | द्विगु |

(ब) अधोलिखितेषु पदेषु उपसर्ग युक्तयोः पदयोः चित्वा लिखत– (2)

(i) पराजयते (ii) पठति

(iii) अपाकरोति (iv) पातुम्

प्र.3 उचित विकल्पं चित्वा लिखत– (1×5=5)

(क) "गच्छथः" इत्यस्मिन पदे वचनम् अस्ति–

(i) एक वचनम् (ii) द्विवचनम्

(iii) बहुवचनम्

(ख) "अपठत्" इत्यस्मिन पदे लकारः अस्ति–

(i) लट् लकार (ii) लोट् लकार

(iii) लङ् लकार (iv) लृट् लकार

(ग) "सान्ति" इत्यस्मिन पदे धातुः अस्ति–

(i) सन् (ii) अस्

(iii) ति (iv) गम्

(घ) "पठामि" इत्यस्मिन पदे पुरूषः अस्ति–

(i) मध्यम (ii) उत्तम

(iii) प्रथम (अन्य पुरूष)

(ङ) "श्वः विद्यालये अवकाशः अस्ति।" इत्यस्मिन वाक्ये अव्ययम् अस्ति–

(i) श्वः (ii) विद्यालये

(iii) अवकाशः (iv) अस्ति



https://www.evidyarthi.in/

प्र.4 उचित विकल्पं चित्वा लिखत– (1×5=5)

(क) गत्वा पदे प्रत्ययः अस्ति–

(i) क्त (ii) ल्यप्

(iii) क्त्वा (iv) शतृ

(ख) "पठ् + तुमुन् = ..............................भवति।

(i) पठित्वा (ii) पठितुम्

(iii) पठन् (iv) पठित्वान्

(ग) "बालिका" इत्यस्मिन पदे प्रत्यय अस्ति–

(i) ङीन (ii) ङीप

(iii) टाप् (iv) मतुप्

(घ) स्वाध्यायान्मा ......................................................................।

(i) प्रमोदः (ii) प्रमुदः

(iii) प्रमादः (iv) प्रमदः

(ङ) "ल्यप्" प्रत्ययस्य उदाहरणं अस्ति–

(i) गत्वा (ii) गन्तुम्

(iii) गतवान् (iv) आगत्य

प्र.5 प्रदत्तैः शब्दैः रिक्त स्थानानि पूरयत (1×5=5)

(क) श्रद्धावान् लभते ..........................................................................। (धणम्/ज्ञानम्)

(ख) विद्या ..........................................................................इव रक्षति। (माता/पिता)

(ग) तपस्वी .................................................................. जपार्थमुपविष्टः। (गङ्गातीरे/यमुनातीरे)

(घ) .......................................................................... भाषणं कुर्याद्। (बकवत्/शुकवत्)

(ङ) मे .......................................................................... शिवसङ्कल्पमस्तु। (मनः/चक्षुः)

प्र.6 अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानां उत्तराणि संस्कृत भाषायां एक वाक्येन लिखत (2×3=6)

(क) विप्र पुत्रस्य नाम किम् आसीत्?

(ख) देहस्य सारं किम्?

(ग) त्रिविक्रमनामा द्विजः कस्य सखा आसीत्?

(घ) युक्तेन प्राणायामेण किं भवति?

(ङ) अष्टमूर्तिः इदानीम् केन नाम्ना प्रख्यातम्?



https://www.evidyarthi.in/

प्र.7 (अ) अधोलिखितयोः शब्दयोः शब्द वचनं विभक्तिं च लिखत– (1×2=2)

(i) मया

(ii) फलानाम्

(ब) अधोलिखितेषु द्वयोः शब्दयोः रूपाणि त्रिषु वचनेषु निर्देशानुसारं लिखत– (1×2=2)

(क) फलम् – तृतीया विभक्ति

(ख) तत्(स्त्रीलिङ्ग) – प्रथमा विभक्ति

(ग) रमा – द्वितीया विभक्ति

प्र.8 अधोलिखितेषु गद्यांशेषु गद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत– (2×5=10)

(क) चन्द्रपुरनाम्नि नगरे श्रेष्ठिनः हरदत्तस्य पुत्रः मनोविनोदस्तु अतीव विषयासक्तः कुपुत्रः पितुः शिक्षां न श्रृणोति स्म। तस्य द्यूतमृगया वेश्यामद्यदिषु अतीव आसक्तिः। कुमार्गचारिणं तं कुपुत्रं दृष्ट्वा तत्पिता हरिदत्तः सपत्नीकः अतीव दुःखितः सञ्जातः। तं हरिदत्तं कुपुत्रदुःखेन पीडितं दृष्ट्वा तस्य सखा त्रिविक्रमनामा द्विजः स्व गृहतो नीतिनिपुणं शुकं सारिकां च गृहीत्वा तद्गृहे गत्वा प्राह – 'सखे हरिदत्त! एनं शुकं पुत्रवत् त्वं सपत्नीकं परिपालय।''

(i) मदनविनोदः कस्य पुत्र आसीत्?

(ii) त्रिविक्रमनामा द्विजः कस्य सखा आसीत्?

(iii) मदन विनोदः पितुः शिक्षां केन कारणेन न श्रृणोति?

(iv) मदन विनोदस्य आसक्तिः केषु आसीत्?

(v) "दृष्ट्वा" इत्यस्य पदस्य प्रकृति प्रत्ययञ्च पृथक् कुरूत।

(ख) अस्ति भागीरथीतीरे गृघ्रकूटनाम्नि पर्वते महान् पर्कटी वृक्षः। तस्य कोटरे दैवदुर्विपाकाद् गलित नखनयने जरद्गवनामा गृघ्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् उद्धृत्य ददति। तेन असौ जीवति। अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान्भक्षितुं तत्रागतः। ततस्तमायातं दृष्ट्वा पक्षिशावकै भयार्तैः कोलाहलं कृतः।

(i) पर्कटी वृक्षः कुत्र अस्ति?

(ii) पक्षिशावकान् भक्षितुं कः आगतः?

(iii) जरद्गवनामा गृघ्रः कुत्र वसति?

(iv) कोलाहलं कैः कृतः?

(v) "भक्षितुम्" इत्यस्य पदस्य प्रकृति प्रत्ययञ्च पृथक् कुरूत।



https://www.evidyarthi.in/

(ग) कुण्डलः कश्चन सदाचारी वृद्धः ब्राह्मणः। सः वेदशास्त्रज्ञः आसीत्। कुण्डलस्य पुत्रः सुकर्मा महान् पितृभक्तः। सः पितुः सकाशादेव वेदशास्त्रयोः अध्ययनं करोति स्म। श्रद्धया मातुः पितुश्च सेवां करोति स्म। सुकर्मा "मातृदेवोभव" "पितृदेवोभव" इतिवचनम् अव्यवधानेन पालयति स्म। सः प्रतिदिनम् नदीतः जलम् आनीय पित्रोः स्नानं कारयति। रूचिकरम् पाकं कृत्वा परिवेषयति रात्रौ जागरितः सन् एव तयोः सेवां करोति। एवं च पित्रौः सेवायामेव तस्य सर्वः अपि समयः व्ययितः भवति स्म।

(i) सुकर्मणः पितुः नाम किम्?

(ii) कः महान पितृभक्तः आसीत्?

(iii) सुकर्मा पितुः सकाशाद् कयोः अध्ययनं करोति स्म?

(iv) कुण्डलस्य पुत्रस्य नाम किम्?

(v) पित्रोः" इत्यस्य पदस्य विभक्तिं वचनञ्च लिखत।

प्र.9 अधोलिखितेषु पद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् लिखत– **(2×5=10)**

(क) मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या।।

(i) मातेव का रक्षति?

(ii) विद्या पिता इव कस्मिन् नियुङक्ते?

(iii) विद्या कां तनोति?

(iv) दिक्षु कीर्तिं का वितनोति?

(v) "इव" इति शब्दः उपसर्गः अस्ति अथवा अव्ययम् अस्ति।

(ख) शुकवद् भाषणं कुर्याद्, बकवद् ध्यानमाचरेत्।
अजवच्चर्वणं कुर्याद् गजवत्स्नानमाचरेत्।।

(i) ध्यानं कथं आचरेत्?

(ii) शुकवद् किम् कुर्याद्?

(iii) चर्वणं कथं कुर्यात्?

(iv) गजवत् किम् आचरेत्?

(v) "कुर्यात्" इति शब्दे का धातुः अस्ति?



https://www.evidyarthi.in/

(ग) जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्
सत्सङ्गति कथय किन्न करोति पुंसाम्।।

(i) सत्सङ्गति पापं किं करोति?

(ii) धियः जाड्यं का हरति?

(iii) का चेतः प्रसादयति?

(iv) सत्सङ्गति वाचि किम् सिञ्चति?

(v) पुंसाम्" इत्यस्मिन पदे का विभक्ति अस्ति?

प्र.10 अधोलिखितेषु केषाञ्चित् चत्वारिणः युग्मेलनं कुरूत– (1×4=4)

| "अ" | | "ब" | |
|---|---|---|---|
| (i) | रक्षकः | (i) | बालस्य माता |
| (ii) | नद्यः | (ii) | रामायणं रचितवान् |
| (iii) | शकुन्तला | (iii) | आस्वाद्यतोयाः |
| (iv) | वृद्ध श्रृगालेन | (iv) | सावहितः |
| (v) | वाल्मीकिः | (v) | प्रतिज्ञातम् |

प्र.11 अधोलिखितेषु वाक्येषु शुद्धनां वाक्यानां समक्षम् "आम्" अशुद्धानां वाक्यानां समक्षं "न" इति लिखत (केचित् चत्वारः) (1×4=4)

(i) गोपालः गीतायाः गाता।

(ii) अजाभिः महिषीः भविष्यन्ति।

(iii) गात्रम् अङ्गेन बिना न शोभते।

(iv) तेजसः बीजं बालः प्रतिभाति।

(v) आरुणिः महान् पितृभक्तः आसीत्।



https://www.evidyarthi.in/

प्र.12 अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृत भाषायां एकपदेन लिखत– (1×4=4)

(i) प्रथम क वन्दत्?

(ii) उज्जयिनीतः का रेखा निर्गता?

(iii) रामः किमर्थं वनं गतः?

(iv) आरूणेः गुरोः नाम किम्?

(v) सद्भिः सङ्ग केन भवति?

प्र.13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत– (4)

प्र.14 स्वमित्राय संस्कृते एकं पत्रं लिखत (4)

**अथवा**

स्वस्य प्राचार्यस्य कृते अवकाशार्थं एकं प्रार्थनापत्रं संस्कृते लिखत।

प्र.15 अधोलिखितेषु पञ्च अशुद्ध कारकवाक्यानां शुद्धि करणीया– (5)

(i) रामः विद्यालये गच्छति।

(ii) माम् दुग्धं रोचते।

(iii) ग्रामस्य अभितः पर्वता सन्ति।

(iv) लक्ष्मणः कन्दुकं क्रिडति।

(v) ईश्वरं नमः।

(vi) वृक्षे पत्राणि पतन्ति।

प्र.16 अधोलिखित वाक्यानां क्रम संयोजनं कुरूत– (5)

(i) सत्यमिदम् – भक्षकात् रक्षकः श्रेयान्।

(ii) राजकुमार सिद्धार्थः विहारार्थं उपवनं गतः।

(iii) देवदत्तः हंस बाणेन विद्धः।



https://www.evidyarthi.in/

(iv) तौ विवादं कुर्वन्तौ राजसभा गतौ।

(v) वाणेन विद्धः हंसः भूमौ अपतत्।

(vi) हंसः सिद्धार्थस्य समीपं गतः।

(vii) हंसः यस्य पार्श्वे आगमिष्यति तस्यैव भविष्यति।

(viii) राजा सर्ववृतान्तं आकर्ण्य आदिशत्।

प्र.17 अधोलिखितम अपठित गद्यांशं सम्यक पठित्वा प्रश्नानाम उत्तराणि संस्कृते लिखत– **(5)**

भारत वर्षे षड्ऋतवः भवन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्र वैशाखे च मासयोः वसन्तस्य ऋतुः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमोदो भवति। नराः नार्यः च सर्वत्र गायन्ति नत्यन्ति। होलिकोत्सवः फाल्गुनन मासस्य पूर्णिमायां भवति। जनाः हर्षातिरेकेण प्रसन्नाभवन्ति ते परस्परं रक्तवर्ण चूर्णं प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति।

(i) भारते कति ऋतवः भवन्ति?

(ii) वसन्तस्य ऋत कदा भवति?

(iii) वसन्तोत्सवे किं भवति?

(iv) होलिकोत्सवे जनाः किं कुर्वन्ति?

(v) अस्य गद्यांशस्य शीर्षकं लिखत।

प्र.18 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृत भाषायां निबन्धं लिखत– **(10)**

(i) उद्यानम्   (ii) मम पाठशाला

(iii) पुस्तकम्   (iv) अस्माकं देशः



https://www.evidyarthi.in/